140
15 (A-B)

१४०
१५

अथ

(A) अष्टपदी ॥ Ashtapadi

(B) होडाचक्रम् ॥ Hodachakram

140/15 (ब)

=पछपदीसटीक

140/15 (ब)

श्री॰ [illegible]य नमः ॥ श्रीकृष्णाय नमः ॥ अथाष्टपदी लिख्यते ॥ चराणां स्थावराणां च येन सृष्टिः कृता पुरा ।
सर्वज्ञाय नमस्तस्मै ज्ञानदात्रे च्युतात्मने ॥१॥ कविनां मतिमालोक्य सतां च सुखबुद्धये ॥ कृता टिप्पणिका लि
ख्यामानांकेन महिकुला ॥२॥ प्रीतये वासुदेवस्य सद्यः पापापनुत्तये ॥ गीतगोविंदकाव्यं जयदेवस्य
कारहं ॥३॥ यस्याय माद्यश्लोकः ॥ मेघैर्मेदुरमंबरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं त्वमेव त
दिमं राधे गृहं प्रापय ॥ इत्थं नंदनिदेशतश्चलितयोः प्रत्यध्वकुंजद्रुमं राधामाधवयोर्जयंति यमुना
कूले रहःकेलयः ॥१॥ राधामाधवयोः रहःकेलयः निकुंजवनक्रीडाः जयंति सर्वोत्कर्षेण वर्तंते ॥ रा
धिका चित्तगोपांगनामुख्या ॥ माधवः लक्ष्मीरूपी नारायणः ॥ सा च स च तौ तयोः व्यभिचरंति चेति व
[illegible] अर्चितपदस्य न पूर्वनिपातः ॥ यथा नरनारायणौ उमामहेश्वरौ काकमयूरावित्यादि ॥ कस्मि
न् यमुनाकूले यमुना नदी तस्याः कूलं तटं तस्मिन् आधारे सप्तमी ॥ किंभूतयोः प्रत्यध्वकुंजद्रु
मं चलितयोः गतयोः ॥ अध्वनि अध्वनि प्रति कुंजे कुंजे प्रति द्रुमे द्रुमे प्रति ॥ वीप्सायामव्ययीभावः ॥ [illegible]
कुंजद्रुमं कामुकानां रमणीयं संकेतस्थानं ॥ कस्मात् गतयोः नंदनिदेशतः नंदगोपः

...यमुनातटे ... मार्गः स्थितः सन् बालकमदहेतुनाद्य उपदध्यादि क्रयविक्रयादिनाद
...महीनां राधां आदिदेश। कथं इत्थं। इत्थं कथं हे राधे तत्तस्माद्धेतोः इमं बालकं गृहं प्रापय। नि
...गच्छ। स्वमनोवांछितं गोचुकामात तथाभिप्रायेण यादवं राधा वदति। ततः कस्मात् यतो न कंर
...बाल्यभावादिति भयेन भीत इति। पुनः राधायाः स्वगतमेवं। अहो आश्चर्यमेतत्। दिन
...वर्तमानेपि किं न केसरदृशं तदाह। मेघैः जलधरैः अंबरं आकाशं मेदुरं व्याप्तं किं... तेन
...तालद्रुमैः तरुभिः घाढं ऊनसंनिभैः वनभुवः अरण्यभुवः श्यामाः निबिडांधकारतुल्याः
...नहेतुना नक्तं ... विनापि बालकोऽज्ञानत्वात् वने बिभेति॥ विद्यमाने भयहेतौ। पुनः किं
...मातुरंतिके वयेत्यर्थः। १॥ सरस्वत्याः प्रसाद विना कथं मन सई स्थितो ग्रंथः करणीय इत्याह
...देवतेत्यादि। ~~...प्रबंधं जयदेवकविः करोति~~। वाग्देवताचरितचित्रितचित्तसद्मापद्माव
...चरणचारणचक्रवर्ती श्रीवासुदेवरतिकेलिकथासमेतमेतं करोति जयदेवकविः प्रबंधं।
...जयदेवकविः करोति। किंभूतं। श्रीवासुदेवरतिकेलिकथासमेतं। श्रीः लक्ष्मीः राधा

पत्नी।वसुदेवस्यापत्यंवासुदेवःकृष्णःकंसदैत्यविनाशायआद्यःश्रीऽन्यामानवावतारेमन्वुऽरूपी।
तंःप्रीतिःकेलिःक्रीडाचश्रीवासुदेवश्चतयोःरतिकेलिकथाभिःसमेतंसंयुक्तं।कथंभूतोजयदेवकविः
पद्मावतीचरणचारणचक्रवर्ती।पद्मावतीलक्ष्मीःतस्याश्चरणेतयोश्चरणंशुश्रूषणंआराधनंत
त्रचक्रवर्ती।सेवकाधिराजः।अथवापद्मावती।तस्यब्राह्मणी।तस्याःनृत्यकालादिविडायांचक्र
वर्ती।पुनःकिंभूतः।वाग्देवताचरितचित्रितचित्तसद्मा।वाक्चासौदेवताचेति।तस्याश्चरितंतेन
चित्रंचित्रीकृतं।चित्तमेवसद्मगृहंयस्यसःतथा।उपास्याक्षरमंत्रदेवतायाश्चरणसपर्या
‥तस्यलब्धविविधविद्यावैभवइत्यर्थः।अनेनलक्ष्मीसरस्वत्यो[illegible]जयदेवेस्थितइतिपंडि
त्यंगमैवसूचितः।वाचःपल्लवयत्युमापतिधरःसंदर्भशुद्धिंगिरांजानीतेजयदेवएवशर
णःश्लाघ्योदुरूहद्रुते।शृंगारोत्तरसत्प्रमेयरचनैराचार्यगोवर्द्धनस्पर्द्धीकोपिनविश्रुतःश्रुति
धरोधोईकविक्ष्मापतिः।।३।।वाचइत्यादि।जयदेवस्यवाचःकोपिकविःस्पर्द्धी।स्पर्द्धवान्समा
नोऽवानविश्रुतः।नविख्यातः।ननुउमापतिधरादयःसंतीत्याह।उमापतिधरो।वाचः।।

[illegible]यति। केवलं कोमलां वाचं विस्तारयति। न तु गिरां वाणीनां संदर्भशुद्धिं जानीते। तथा शरणः क
श्लाघ्यः प्रशस्तः। कस्मिन् विषये। दुरूहद्रुते। दुःखेन ऊहितुं शक्यत इति दुरूहं। दुरूहं च द्रुतं च
स्मिन् अतिशीघ्रं वक्तुं समर्थ इत्यर्थः। तथा आचार्यो गोवर्द्धनः श्लाघ्यः। कैः शृंगारोत्तरसत्प्रमे
यरचनैः शृंगारोत्तराणि शृंगारप्रधानानि च सत्प्रमेयानि उत्कृष्टप्रमेयानि च तेषां रचनानि। शृंगारो
त्तरसत्प्रमेयरचनानि तैः। धोई नामा कविक्ष्मापतिः। कविराजः श्रुतिधरः। श्रुत्वा श्रवणेन धार
यतीत्यर्थः। अस्य श्लोकस्य कविः क्षितिपतिः। राजा लक्ष्मणसेनः। अस्मिन् ग्रंथे किं वक्तव्यं जन
[illegible]नप्रयोजनं तदाह। यदीत्यादि॥ यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कु
तूहलं। मधुरकोमलकांतपदावलीं शृणु तदा जयदेवसरस्वतीं॥४॥ हरिस्मरणे श्री
कृष्णानुचिंतने यदि मनो हृदयं सरसं मनो यदि विलासकलासु तव कुतूहलम् अस्ति। विलासानां क
लासु कौतूहलं औत्सुक्यं। कुतुकं च कुतूहलमित्यमरः। तदा हे बुधजन जयदेवकवेः सरस्वतीं वा
णीं शृणु। आकर्णय। कथंभूतां सरस्वतीं मधुरकोमलकांतपदावलीं। मधुरं स्वादुकर्णपेयं।।।

[illegible]मर्थ स्निग्धं । कांत कमनीयं । एते गुणा एकरूपे पदावली पद पंक्तिः यस्याः सा तथा तां ॥ प्रलयेत्यादि
मालव रागे रूपक ताले ॥ प्रलय पयोधि जले धृतवानसि वेदं । विहित वहित्र चरित्रमखेदं ॥
केशव धृत मीन शरीर । जय जगदीश हरे ॥ १ ॥ ध्रुव पदं ॥ हे केशव धृत मीन शरीर । धृतं मीन
शरीरं येन सः तस्य संबोधनं । हे धृत मीन शरीर । अखेदं यथा स्यात्तथा । त्वं वेदं धृतवानसि
[illegible]स्मिन् प्रलय पयोधि जले । प्रलये संवर्त्तकाले पयोधिः समुद्रः । तस्य जलं तस्मिन् । महाप्रलय
[illegible] परमेश्वरो वेदं स्थित्वा तत्प्राणमुत्पाद्य । तस्मिन् प्रयच्छति । यो ब्रह्माणं विदधाति । पूर्वं यो वै
[illegible]दांश्च प्रहिणोति तस्मै इति श्रुतेः । किंभूतं वेदं । विहित वहित्र चरित्रमखेदं । विहितं कृ
[illegible]तं वहित्रस्य पोतस्य चरित्रं आचरितं ॥ येन स तथा । वहित्रं हि सागर तारकं भवति । वेदोपि नै
[illegible]तैक कर्म प्रतिपादन द्वारेण संसार सागर तारको भवतीत्यर्थः । जगंति ईष्टे नियमयतीति
[illegible]जगदीशः । तस्य संबोधने हे जगदीश । हे हरे । स्मृतः सन् । हरति संसार क्लेशमिति । हरिः । ३
[illegible]स्य संबोधनं हे हरे । त्वं जयस्व । मायया शत्रु संहरण द्वारेण स्वभक्त परिपालनेन सर्वोत्कृ

...भच। क्षितिरितित्यादि। क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे। धरणिधरणकिणचक्रगरिष्ठे। केशव
धृतकच्छपरूप जय जगदीश हरे।२। हे केशव धृतकच्छपरूप। धृतं कच्छपस्य रूपं येन सः तथा। संबुद्धिः
तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। किंभूते। अतिविपुलतरे। अतिशयेन विपुलं विस्तीर्णं तस्मिन्। पुनः
किंभूते। धरणिधरणकिणचक्रगरिष्ठे। धरण्याः भूमेर्धरणं तेन किणः भूतरक्तग्रंथिः।। स एव चक्रं
...रः तेन गरिष्ठे। गुरुतरे। तस्मिन्। जगदीश हरे इति सर्वयोज्यं।। वसतीति। वसति दश
नशिखरे धरणी तव लग्ना। शशिनि कलंककलेव निमग्ना। केशव धृतशूकररूप जय ज
गदीश हरे।३। हे केशव तव दशनशिखरे दंतस्याग्रे लग्ना धरणी पृथ्वी वसति तिष्ठति
दशनस्य शिखरं तस्मिन्।। कस्मिन् केशव शशिनि चंद्रे निमग्ना कलंककलेव। कलंक
स्य कला कलंककला।। तवकरेत्यादि। तव करकमलवरे नखमद्भुतशृंगं। दलितहिरण्यक
शिपुतनुभृंगं।। केशव धृतनरहरिरूप जय जगदीश हरे।४। हे केशव धृतनरहरिर्नृसिंहः

...नरहरे:

...नरहरि:रूपं येन स तथा। तव करकमलवरे नखं तिष्ठति। कर एव कमलवरं पद्मश्रेष्ठं तस्मिन्
किंभूतं नखं। अद्भुतशृंगं। अद्भुतं आश्चर्यं जनकं शृंगं। अग्रभागो यस्य स तत्र। अदृष्टपूर्वमि
त्यर्थ:। पुन: किंभूतं दलितहिरण्यकशिपुतनुभृंगं। हिरण्यकशिपोस्तनु:शरीरं। सैव श्यामत्वा
द्भृंग:। दलितो विदारितो हिरण्यकशिपोस्तनु:शरीरं भृंगो येन स तथा। तत्र॥ छलयसीति॥
...यसि विक्रमणे बलिमद्भुतवामन। पदनखनीरजनितजनपावन। केशव धृतवामनरूप
जय०॥५॥ केशव धृतवामनरूप। धृतं वामनरूपं येन स: तथा। तस्य संबोधनं। हे अद्भुत
वामन। अद्भुतं अदृष्टपूर्वं दैत्यानां दर्पं दमयतीति वामन:। अद्भुतश्चासौ वामनश्च तस्य
संबोधनं। हे अद्भुतवामन। त्वं बलिं छलयसि। कस्मिन् विषये विक्रमणे। विपदैर्विरूपधःत
प्याक्रमणं तस्मिन् इति ध्वनि:। विक्रमणविषये। हे पदनखनीरजनितजनपावन। पदस्य न
खा: पदनखा: तेषां नीरं। जलं तेन जनितं उत्पादितं जनाय पावनं पवित्रीभावो येन स: तथा
तस्य संबोधनं। क्षत्रियेति। क्षत्रियरुधिरमये जगदपगतपापं। स्नपयसि शमितभवता पयसि
केशव धृतभृगुपतिरूप जय०॥६॥ हे धृतभृगुपतिरूप। धृतं भृगुपते: परशुरामस्य ११४

स्य नाशो तस्य संबोधनं। त्वं जगत् संसारं स्नपयसि। स्नानं कारयसि। कस्मिन् पयसि पा
नीये। किंभूते। क्षत्रियरुधिरमये। क्षत्रियाणां रुधिरं तदेव स्वरूपं यस्य तत्तथा। तस्मिन्। किं
भूतं जगत्। अपगतपापं। स्नानमात्रे अपगतं नष्टं पापं यस्य तत्तथा। पुनः किंभूतं शमि
तभवतापं। शमितः शांतिं प्रापितो भवस्य संसारस्य तापो येन तत्तथा॥ वितरसीत्यादि। वि
तरसि दिक्षु रणे दिक्पतिकमनीयं। दशमुखमौलिबलिं रमणीयं केशव धृतरघुपतिरूप
जय॥ ६॥ हे केशव धृतं रघुपतेः श्रीरामस्य रूपं येन सः तत्तथा। तस्य संबोधनं। त्वं रणे संग्रामे
दिक्षु आशासु दशमुखमौलिबलिं वितरसि। दशमुखानि यस्य तस्य मौलयो मूर्द्धानः स एव
बलिः भूतोपहारस्तं। किंभूतं। दिक्पतिकमनीयं। दिशां पतयः इंद्रादयः तेषां कमनीयो ऽभि
लषणीयः। पुनः किंभूतं॥ रमणीयं शोभनं॥ वहसीत्यादि। वहसि वपुषि विशदे वसनं जल
दाभं हलहतिभीतिमिलितयमुनाभं। केशव धृतहलधररूप जय जगदीश हरे॥ ८॥ हे केश
व धृतहलधररूप धृतं हलधरस्य बलभद्रस्य रूपं येन स तत्तथा। तस्य संबोधने हे धर
रूप त्वं विशदे निर्मले वपुषि शरीरे वसनं दुकूलं वहसि। किंभूतं वसनं जलदा

कुलदो। भीत मेघः तस्याभेवाभा यस्य तत्तथा। पुनः कथं धृतं। हलहतिभीतिमीलितयमुनाभं
हलेन हतिः हहननं तस्याः भीतेर्भयात् मिलिता आगता चासौ यमुना च तस्याः आभेवाभा दीप्ति
र्यस्य तत्तथा॥ निंदसीत्यादि। निंदसि यज्ञविधेरहह श्रुतिजातं। सदयहृदयदर्शितपशुघा
तं। केशवधृतबुद्धशरीर जय जगदीश हरे।९। हे केशव धृतबुद्धशरीर। त्वं श्रुतिजातं
वेदार्थतत्वं निंदसि। कस्य यज्ञविधेः यज्ञानां विधिर्विधानं तस्य किंभूतं। दर्शितपशुघातं। स
दयहृदया ब्राह्मणाः तेषां दर्शितः पशुघातो मारणं येन स तत्तथा। कथं निंदसि। अहहेतिक
णादि पशुघातं। धिगिति। तस्य संबोधने। बौधागमशास्त्रे। अहिंसा परमो धर्म इति न्यायात्॥
म्लेछनिवहेत्यादि। म्लेछनिवहनिधने कलयसि करवालं। धूमकेतुमिव किमपि करालं।
केशवधृतकल्किशरीर जय जगदीश हरे।१०। केशव धृतकल्किशरीर। धृतं कल्किश
रीरं येन तस्य संबोधनं। त्वं किमपि। अद्भुतं स्यात्तथा। करवालं खड्गं कलयसि। धारयसि
किंनिमित्ते। म्लेछनिवहनिधने। म्लेछानां पापिष्ठानां निवहः व्यूहः तस्य निधनं

...शस्त्रास्त्राणि नु किंभूतं। करालं भयंकरं। धूमिव धूमकेतुमिव। जयदेवेत्यादि॥ श्रीजयदेवक
...दमुदितमुदारं। शृणु सुखदं शुभदं भवसारं। केशव धृत दशविधरूप जय जगदीश हरे॥ २१।
मुदितं जनं। श्रीजयदेवकवेः। उदितं उदारं। स्तुत्यर्थं चे शृणु। किंभूतं। सुखदं श्रुतिमात्रेण। पुनः
...भूतं भवसारं। भवे संसारे सारं। गीतपर्यं श्लोकेन गृह्णाति॥ वेदानिति। वेदानुद्धरते जग
...निवहते भूगोलमुद्बिभ्रते दैत्यं दारयते। बलिं छलयते क्षत्रक्षयं कुर्वते। पौलस्त्यं जयते
...हलं कलयते कारुण्यमातन्वते। म्लेच्छान्मूर्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः॥ २२॥ हे ते
...तुभ्यं नमः। नमस्कारोऽस्तु। किंभूताय तुभ्यं। दशाकृतिकृते कृष्णाय। दश च ता आकृतय
...रीराणि च ताः करोतीति दशाकृतिकृत् तस्मै। कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः।
तयोरैक्यं परं ब्रह्म कृष्ण इत्यभिधीयते। तस्मै कृष्णाय परब्रह्मणे। मायावशादाकृतिकरणं। जग
...जत्रयं च पाति। पुनः किंभूताय वेदानुद्धरते। उद्धरणं करोतीति उद्धरन् तस्मै। पुनः किंभूताय
...भूगोलं भूमण्डलं उद्बिभ्रते। उद्बिभर्तीति उद्बिभ्रत् तस्मै। पुनः किंभूताय दैत्यं दारयते। दार

यतीति दारयन् तस्मै। दैत्यो हिरण्यकशिपुः। पुनः किंभूताय। बलिं वैरोचनिं छलयतीति छलयन् तस्मै
पुनः किंभूताय। क्षत्रक्षयं कुर्वते। क्षत्रस्य क्षत्रियजातस्य क्षयं नाशं करोतीति कुर्वन् तस्मै। पुनः
किंभूताय। पौलस्त्यं जयते। पुलस्त्यस्यापत्यं पुमान् रावणः तं जयतीति जयन् तस्मै। पुनः किंभूताय॥
[illegible]कएवमातन्वते करुणां प्रचुर्यं आतनोतीति आतन्वन् तस्मै। पुनः किंभूताय। म्लेच्छान् मूर्छयते
म्लेच्छान् मूर्छयतीति मूर्छयन् तस्मै। स्वशरणागतसकलजनरमणत्वेन सर्वोत्कृष्टतयावर्तिस्व॥
[illegible]त्वेन कृष्णरूपतः इत्यादि वा केशवस्य कर्म वराह नृसिंह वामन परशुराम दाशरथिराम बल
बुद्ध कल्की इत्यवतारदशकं बोध्यं जय जयेति यदुक्तिरादेशरूपस्य वाक्यस्य इत्यादि। गूर्ज
[illegible]तिमीहताले॥ श्रितकमलाकुचमंडल धृतकुंडल ए। कलितललितवनमाल जय १।
देव हे हरे। जय जय। हे श्रितकमलाकुचमंडल। श्रितं आश्रितं कमलायाः लक्ष्म्याः कुचम
ण्डलं कुचाभोगं येन स तथा। तस्य संबोधने हे श्रितकमलाकुचमंडल। पुनः किंभूतः। हे धृत
कुंडल। धृते कुंडले येन स तथा। तस्य संबोधने। पुनः किंभूतः। कलितललितवनमाल॥

कलिता ललिता स्वीकृता मनोहरा वनमाला येन तस्य संबोधने हे कलितललितवनमाल । हरे हे देव ॥
जय जय प्रसन्नो भव । सर्वैः कृपैः स्वावर्जनं स्येति ॥ दिनमणीत्यादि । दिनमणिमंडलमंडन भवखंडन ए ।
मुनिजनमानसहंस जय जय देव हरे । २ । हे दिनमणिमंडलमंडन । दिनस्य मणिः सूर्यः तस्य
मंडलं मंडयतीति तथा । तस्य संबोधने । पुनः किंभूत । हे भवखंडन । भक्तानां सेवकानां
भवो जन्म खंडयतीति तथा । तस्य संबोधने । मुक्तिं ददातीत्यर्थः । पुनः किंभूतः । हे मुनिजनमा
नसहंस । मुनेश्च जनाश्च तेषां मानसानि तत्र हंसः तस्य संबोधने । स्वच्छतया शुद्धभावेन
हृदयस्य मानससरोवरस्य । शब्दहलेन तुल्यता । जय जय देव हरे इति योजनीयमित्यर्थः । कालीयेति ॥
कालियविषधरगंजन जनरंजन ए । यदुकुलनलिनदिनेश जय जय देव हरे । ३ । १ । किंभूत
हे कालियविषधरगंजन । कालियश्चासौ विषधरश्च व्यालः तं गंजयतीति । तस्य संबोधनं । पुनः
किंभूतः । हे जनरंजन । जनं स्वभक्तं रंजयतीति तथा । तस्य संबोधनं । पुनः किंभूतः । यदुकुलन
लिनदिनेश । यदूनां कुलं वंशः तदेव नलिनं तस्य दिनेशः । सविता प्रकाशतः ॥ ४ । मधुमुरेत्यादि ।

मधुमुरनरकविनाशनगरुडासनए।सुरकुलकेलिनिदानए जयजयदेवहरे॥४॥ध्रु॥ किंभूतः
हेमधुमुरनरकविनाशन।मधुश्चमुरश्चनरकश्चमधुमुरनरकाः।दैत्यविशेषाः।ता
न्विनाशयतीतितथा।यद्वा।मधुमुरनामानौदैत्यौतयोःस्वेनवधातिचात्रनरकंदुर्गतिंवि
नाशयतीतितथातस्यसंबोधनं।पुनःकिंभूतःसुरकुलकेलिनिदान।सुराणांकुलंसमूहः
तस्यकेलिःक्रीडातस्याःअनुग्रहद्वारेणनिदानं।आदिकारणं।तस्यसंबोधनं॥अमलकमलेति
अमलकमलदललोचनभवमोचनए।त्रिभुवनभुवननिधानजयजयदेवहरे।५।ध्रु।हे
अमलकमलदललोचन।अमलंशुद्धंयत्कमलंतस्यदलंतद्वत्लोचनेयस्य।तस्यसंबोधनं
पुनःकिंभूतः।भवमोचन।भवात्संसारात्मोचयतीतिभवमोचन।पुनःकिंभूतः।त्रिभुवन
भुवननिधान।त्रयाणांभुवनानांत्रिभुवनं।तस्यभुवनंउत्पत्तिः।तस्यानिधानंआधारः।त
स्यसंबोधनं।अथवा।त्रिभुवनमेवभवनमिवभवनंआश्रयः।जनकसुतेत्यादि॥जनक स्य सं
सुताकृतभूषणजितदूषणए।समरशमितदशकंठजयजयदेवहरे॥६॥ध्रु॥हेजनक

५९।

मधुमुरनरकविनाशनगरुडासनए। सुरकुलकेलिनिदानजयजयदेवहरे॥५॥२॥ किंभूतः
हे मधुमुरनरकविनाशन। मधुश्च मुरश्च नरकश्च मधुमुरनरकाः। दैत्यविशेषाः। ता
न् विनाशयतीति तथा। यद्वा। मधुमुरनामानौ दैत्यौ तयोः स्वेन वधात् इत्यात् नरकं दुर्गतिं वि
नाशयतीति तथा तस्य संबोधनं। पुनः किंभूत। सुरकुलकेलिनिदान। सुराणां कुलं समूहः
तस्य केलिः क्रीडा तस्याः अनुग्रहद्वारेण निदानं। आदिकारणं। तस्य संबोधनं॥ अमलकमलेति
अमलकमलदललोचनभवमोचनए। त्रिभुवनभुवननिधानजयजयदेवहरे॥५॥३॥ हे
अमलकमलदललोचन। अमलं शुद्धं यत्कमलं तस्य दलं तद्वल्लोचने यस्य। तस्य संबोधने
पुनः किंभूतः। भवमोचन। भवात्संसारान्मोचयतीति भवमोचन। पुनः किंभूतः। त्रिभुवन
भुवननिधान। त्रयाणां भुवनानां त्रिभुवनं। तस्य भुवनं उत्पत्तिः। तस्या निधानं आधारः। त स्य सं
स्य संबोधनं। अथवा। त्रिभुवनमेव भवनमिव भवनं आश्रयः॥ जनकसुतेत्यादि॥ जनक
सुताकृतभूषणजितदूषणए। समरशमितदशकंठजयजयदेवहरे॥६॥७॥ हे जनक

सुताहृतभूषण। जनकस्य सुता सीता तस्याः हृतं शोकनिवृत्तिकादि भूषणं मलेकरणं येन सः तस्य
संबोधनं। पुनः किंभूतः। समरशमितदशकंठ। समरे संग्रामे शमितः शांतिं प्रापितो दश
कंठो रावणो येन सः तथा। तस्य संबोधनं।। अभिनवेति। अभिनवजलधरसुंदर धृतमंद
रए। श्रीमुखचंद्रचकोर जय जय देव हरे।। ४।। पुनः किंभूतः। हे अभिनवजलधरसुंदर
अभिनवो नवीनो यासौ जलधरश्चेति तद्वत्सुंदरः। श्यामः। तस्य संबोधनं। पुनः किंभूतः। धृ
तमंदर। धृतो मंदरनेन धृत पृष्ठे मंदराचलो येन सः तथा। तस्य संबोधनं। पुनः किंभूतः। श्री
मुखचंद्रचकोर। श्रीयो लक्ष्म्याः मुखं तदेव चंद्रः तस्य चकोरः। तस्य संबोधनं। चकोरो हि। चं
द्ररश्मिपानं करोति। अयमपि श्रीमुखाधरपानं करोतीति। अर्थाभिप्रायः।। श्रीजयदेवेति
र। श्रीजयदेवकवेरिदं कुरुते मुदं। मंगलमुज्वलगीतं जय जय देव हरे।। ५।। श्रीजयदेवक
वेः इदं श्रो[illegible]णां मुदं हर्षं कुरुते जनयति। किंभूतं मंगलं श्रवणमात्रेण कल्याणप्रापकं। हे उ
ज्वलमंगलगीत। उज्वलं निर्मलं गीतं यस्य तस्य संबोधने। हे उज्वलगीत। हे हरे हे देव जय
जय सर्वोत्कर्षेण वर्त्तस्व।।

लेत्यस्यां । अत्रायं श्लोकेनावतारयति । पद्मेति । ॐ पद्मापयोधरतटीपरिरंभलग्नकाश्मीरमु
द्रितमुरो मधुसूदनस्य । व्यक्तानुरागमिव खेलदनंगखेदस्वेदांबुपूरमनुपूरयतु प्रियं वः ॥२॥ मधुसू
दनस्य मुरारेरुर एव क्रोडो वो युष्माकं प्रियं अपेक्षितं अनुपूरयतु । करोतीत्यर्थः । किंभूतं मुरं । पद्मा
पयोधरेतटीपरिरंभलग्नकाश्मीरमुद्रितं । पद्मायाः लक्ष्म्याः पयोधरौ तयोस्तटीपरिसरः पा
र्श्वभागः तस्याः परिरंभः उपगूहनं तेन लग्नं च तत् । काश्मीरं कुंकुमं चेति । तेन मुद्रितं स्तनाग्र
लग्नकुंकुमलांछितं चिह्नितं । ममैवेदं मुरारेरुरो नान्यस्येत्यभिप्रायेण मुद्रितं चिह्नितं ममैवेदं
अन्यो विस्वयवस्तुनि द्रव्येणाग्रं ग्रंथिमुद्रांकलदं करोतीत्यर्थः । किंभूतमिव । व्यक्तानुरागमिव
अंतःस्थितः सन् बहिर्निःसृत्य व्यक्तः आविर्भूतः अनुरागः प्रेम यस्मिन् तत् तथाभूतमिव ॥
पुनः किंभूतं । खेलदनंगखेदस्वेदांबुपूरं । खेलन् क्रीडन्नसौ अनंगश्चेति । तेन खेदः श्रमः
स्तेन स्वेदांबु स्वेदरूपं नीरं तस्य पूरः प्रवाहः समूहो येन तत्तथा । तस्मिन् भूततरु । जीतार्थे
श्लोकेन सूचयति ॥ वसंतेति । वसंते वासंतीकुसुमसुकुमारैरवयवैर्भ्रमंतीं कांतारे बहुवि
हितकृष्णानुसरणां । अमंदं कंदर्पज्वरजनितचिंताकुलतया चलद्बाधां राधां सरसमिदमूचे
सहचरी ॥२॥

११८

राधां इति सहचरी सखी सरसं यथा स्यात्तथा पद्येन गीतेन वक्ष्यमाणं । इदमेव ऊचे उवाच । रसे
न सह वर्त्तत इति सरसं तत्क्रियाविशेषणं । कृतायां तं नपुंसकमेव । किंभूतां राधां । चलद्बाधां
चलंती धर्ममाना बाधा व्यवस्था यस्याः सा तां । कस्मिन् काले वसंते । किंभूतां । भ्रमंतीं चलंतीं । कस्मिं
कांतारे दुर्गपथि । कैः अवयवैः चरणादिभिः । किंभूतैः । वासंतीकुसुमसुकुमारैः । वासंती माध
वीलता तस्याः कुसुमानि तद्वत्सुकुमाराः मृदुलाः तैः । पुनः किंभूतां । बहुविहितकृष्णानुसरणां
बहुधा अनेकप्रकारेण आ समंतात् वा बहु विहितं कृतं कृष्णान्वेषणं यया सा । तथा तां । कया हेतुभूत १
या अमंदं अत्यर्थं यथा स्यात्तथा । कंदर्पज्वरजनितचिंताकुलतया । दाह हेतुत्वात् । कंदर्प ए
व ज्वरः । अपरः वा कंदर्पेण ज्वरः तं जनिता प्रादुर्भूता चिंता तया आकुला व्याकुला तस्याः भावः तया
वसंतरागे रूपकताले । ललितेति । ललितलवंगलतापरिशीलनकोमलयसमीरे । मधुकरनिक
रकरंबितकोकिलकूजितकुंजकुटीरे ॥१॥ विहरति हरिरिह सरसवसंते । नृत्यति युवतिजने
न समं सखि विरहिजनस्य दुरंते । ध्रुवपदं । हे सखि राधे इह । अस्मिन् । सरसवसंते हरिः
मधुव

...सः विहरति। क्रीडति। सकलपुष्पादिरसेन सह वर्त्तत इति सरसः। सरसश्चासौ वसंतश्चेति।
तस्मिन्। न केवलं विहरति। नृत्यति च। कथं। समं सार्द्धं केन युवतिजनेन। युवतिश्चासौ जनश्चेति
तस्मिन्। जात्यभिप्राये एकवचनं। साकं सार्द्धं समं सह। तृतीया सहयोगे। किंभूते वसंते। दुःखेन
प्राप्यते अंतः अवसानं समाप्तिर्यस्य सः। तथा तस्मिन्। कस्य। विरहिजनस्य। स्वप्रमदायाः सकाशा
द्विरहो विश्लेषो यस्यास्तीति स विरही। स चासौ जनश्चेति। तस्य विरहिजनस्य। दुरंतत्वं दर्शय
ति। पुनः किंभूते। ललितलवंगलतापरिशीलनकोमलमलयसमीरे। ललिता रमणीयाश्च ता लवंग
लताश्च तासां परिशीलनं संस्पर्शः तेन कोमलो मंदो मलयसमीरः चंदनाचलवायुर्यत्र तस्मिन्
पुनः किंभूते। मधुकरनिकरकरंबितकोकिलकूजितकुंजकुटीरे। मधुकराणां भ्रमराणां निकरः
समूहः तेन करंबिता मिश्रिताश्च ते कोकिलाश्च तेषां कूजितं भाषितं कुंजकुटीरं यस्मिन् सः तथा र:
तस्मिन्। कुंजान्येव कुटीराणि गृहस्थमंदिराणि॥ उन्मदेति। २। उन्मदमदनमनोरथपथिकवधू
जनजनितविलापे। २। पुनः किंभूते। उन्मदमदनमनोरथपथिकवधूजनजनितविलापे। उन्मद
मदनश्च उन्नतो दुष्कामो यत्र एवंविधो मनोरथः कामस्तु कस्पृहा। तया युक्ता नां पथिकवधूजनानां उ

तो विलापः परिदेवनं यस्मिन् वसंते येन वा । सः तथा तस्मिन् । अथवा पथिकानां वधूजनः । तज्जनस्य म
येन्न ते तथा चासौ मदनश्च तेन मनोन्य प्रियसंगमाभिलाषो येषां । ते तथा ते च ते पथिकवधूजनाश्च तै
नितः विलापः परिदेवनं यत्र । सः तथा तस्मिन् । पुनः किंभूते । अलिकुलसंकुलकुसुमसमूहनिराकुल
कुलकलापे । अलीनां भ्रमराणां कुलं समूहः तेन संकुला व्याप्ता । स चासौ कुसुमसमूहश्च निरंतरं आकुल
त्राः । बकुलानां कलापाः समूहा यत्र स तथा तस्मिन् बकुलो वंजुलो अशोक समो केसर कदम्ब डिमा वित्यमरः । मृगम
दसौ । मृगमदसौरभरभसवशंवदनवदलमालतमाले । युवजनहृदयविदारणमनसिजनखरुच
किंशुकजाले । पुनः किंभूते । मृगमदसौरभरभसवशंवदनवदलमालतमाले । मृगमदः कस्तूरी । तस्य
सौरभं आमोदः तस्य रभसः आधिक्यं । तस्य वशंवदानि अनुसारीणि सदृशानि तद्वत्सुगंधीनि तानि च नवदलानि
नूतनपर्णानि तेषां मालं समूहः तत्तमालो यत्र स तथा । तस्मिन् । पुनः कथंभूते । युवजनहृदयविदारणमनसिज
नखरुचि किंशुकजाले । युवानो तरुणाः जनाश्च तेषां हृदयानि तेषां विदारणे तस्मिन् मनसिजनखाः
कंदर्पकरजाः तेषां रुचिरिव दीप्तिर्येषां तानि तथा तानि च नवकिंशुकानि पलाशकुसुमानि च तेषां जालं स
मूहो यस्मिन् स तथा तस्मिन् ॥ मदनेति ॥ मदनमहीपतिकनकदंडरुचिकेसरकुसुमविकाशे ॥

॥१ मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे ॥४॥ पुनः किंभूते । मदनमहीपतिकनकदंडरुचिकेसर
कुसुमविकाशे । मदनश्चासौ महीपतिश्च तस्य कनकदंडः तस्य रुचिरिव रुचिर्येषां तानि तथा । तानि केसर
कुसुमानि ना[illegible]रकुसुमानि तेषां विकाशो विकसनं यस्मिन् स तथा । पुनः किंभूते । मिलितशिलीमुखपाटलि
पटलकृतस्मरतूणविलासे । मिलिताः शिलीमुखाः षट्पदा यस्मिंस्तत्तथा । तच्च तत्पाटलपटलं पाटलपाटलकु
सुमनिवहं च तेन कृतो हेतुः स्मरस्य तूणविलासः । स्मरस्य मदनस्य तूणीरस्य शोभाकारो यस्मिन् । विगलि
[illegible]॥ विगलितलज्जितजगदवलोकनतरुणकरुणकृतहासे । विगलिता गता लज्जा यस्य निर्लज्जस्य दि र्व
शः । तज्जगत् तज्जगतश्चावलोकनं तस्मात्तरुणैर्नवैः करुणतरुभिः कृतो हासः पुष्पलक्षणो यस्मिन् स तथा
अथवा । अवलोकनेन तरुणकरुणानि नवीनकरुणकुसुमान्येव कृतो हासो येन वसंतेन स तथा । तम्
। पुनः कथंभूते । विरहिनिकृंतनकुंतमुखाकृतिकेतकिदंतुरिताशे ॥ विरहिणां वियोगिनां निकृंतनं छेद
नं तस्मै कुंतः अरलविशेषः कामप्रासः । तस्य मुखमग्रभागः तस्याकृतिरिवाकारो येषां तानि तथा । तानि च के
तकिदंतुरिताश्च ताः आशा दिशो यस्मिन् स तथा तस्मिन् । दंतुरितस्येव कस्याचरितानि केतकीनां दंतु
राणि मुकुलानि । ८ अथवा । कुंतमुखस्येवाकृतिर्यासां ताः तथा । ताश्च ताः केतक्यः केतकीमुकुलानि च ताभि

र्हतुरितात्र्याशादिशोपस्मिन् भूतया ॥ माधविकेति । माधविकापरिमलललितेनवमालतिजातिसुगंधौ ।
मुनिमनसामपिमोहनकारिणितरुणाकारणबंधौ । पुनः किंभूते । माधविकापरिमललिते । माधविका
याः कुसुमितवासंत्याः परिमलो गंधोतेनललितः रमणीयः तस्मिन् । पुनः कथंभूते । नवमालतिजातिसुगंधौ
नवानेतनाम्भूतामालत्यश्चतासांजातिः प्रादुर्भावः जनी प्रादुर्भावेइत्यस्यजादेशेक्तेतिप्रत्ययः । तया सोभ
नोगंधोयस्मिन् सतथा । अथवा । नवमालिकजातिसुगंधाविति पाठेनवमालिकयाकरणभूतयापुष्पवि
शेषेणअतिगंधोनवाचासौमालिकाचेति । तथा । पुनः कथंभूते । मोहनकारिणि मोहनंवैचित्यंकर्तुंशी
लमस्येतिसतथा तस्मिन् । केषांमुनिमनसामपि । मुनयोजितेंद्रियाः । वनवासिनो विकाररहीताः नित्यनेमि
त्तिकादिव्रताचारवंतस्तेषामपि । पुनः किंभूते । तरुणाकारणबंधौ । तरुणांयुवकजनानांतुकारणेन उपकारं
विनाबंधुहितकारी । कामोद्दीपनत्वात् । तस्मिन् । स्फुरतीति ॥ ४ ॥ स्फुरदतिमुक्तलतापरिरंभणमुकु
लितपुलकितचूते । वृंदावनविपिनेपरिसरपरिगतयमुनाजलपूते ॥ ७ ॥ पुनः कथंभूते । स्फुरंतीपु
ष्पवंतीचासौअतिमुक्तलताचवासंती । तस्यापरिरंभणं । कर्तृविषष्ठी । तेनमुकुलितः पुलकितः रोमां

हंतक्ष्म स्तत: आम्रवृक्षो यत्र सततया तत्। स्मिन्। कस्मिन् स्थाने हरिर्विहरति। वृंदावनविपिने। वृंदावना
ख्यं यद्विपिनं तत्र स्मिन्। पुन: किंभूते। परिसरपरिगतयमुनाकूलपूते। परिसरे समीपे परिगतं स
तो ग। हतं तच्च यमुनाकूलं च तेन पूते पवित्रीभूते। तस्मिन्। श्रीजयदेवेति॥ श्रीजयदेवभणि
तमिदमुदयति हरिचरणस्मृतिसारं। सरसवसंतसमयवनवर्णनमनुगतमदनविकारं॥ ल॥
विहरति। हरिचरणेनतयो: स्मृति: स्मरणं। तत्र सारं। मुख्यमेव न भूतं। पुन: किंभूतं। अनुगतमदन
विकारं। अनुगता अनुस्फुरता मदनविकारो यस्मिन्। पथिकवधूजनकृतनिजविलापे। इति आच्छ
निभिप्रायं वसंतश्लोकाभ्यां वर्णयति॥ दरविदलितेत्यादि। दरविदलितमल्लीवल्लिचंचत्परागप्रकटि ला३
तपटवासै: दरं विदलिताई षद्विकसिताश्च ता मल्ली इह हि दहति चेत: केतकीगंधबंधु: प्रसरद
समबाण: प्राणवत् गंधवाह:॥१॥ हे राधे। गंधवाह: मलयजो वायु: इह वसंते विरहिणीनां चेतो दहति।
किं कुर्वन्। वासयन्। सुगंधयन्। कानि काननानि वनानि। वल्यश्च तास्तु चंचयंत:। इतस्ततो वं
चयंत: ते च ते परागाश्च पुष्परेणवश्च सुगंधिवस्तुचूर्णानि च। अपरं च। तै: परागै: प्रकटिता पटवा
सा: प्रकटिताश्च ते पटु उत्कृष्टाश्च ते वासाश्च तै:। अनु विरहिणां दहति। किंभूत:। प्रसरदसमबाण
वासयन्काननानि ॥११॥

जि

॥ श्रीगणेशाय नमः ॥ प्रणम्य भारतीं भक्त्या गणेशं च गुरुं तथा ॥ समाहृत्यान्यग्रंथेभ्यो
होडाचक्रं विरच्यते ॥ १ ॥ मृगादि षट् मास उत्तरायण ॥ कर्कादि षट् मास दक्षिणाय
ना इति अयन ॥ वसंत ग्रीष्म वर्षा सरद इति रितु ॥ शुक्ल कृष्ण इ पक्ष ॥ आदित्य चंद्र
मंगल बुध गुरु शुक्र शनि राहु केतु इति नवग्रह ॥ प्रतिपदा द्वितीया त्रितीया चतु
र्थी पंचमी षष्ठी सप्तमी अष्टमी नवमी दशमी एकादशी द्वादशी त्रयोदशी चतु
र्दशी पौर्णमाशी अमावास्या इति तिथी ॥ चैत्र वैशाष जेष्ट असाढ श्रावण भाद्रपद
आश्विन् कार्तिक मार्गशिर पौष माघ फाल्गुन इति मासः ॥ मेष वृष मिथुन कर्क सिंह क
न्या तुला वृश्चिक धन मकर कुंभ मीन इति राशि ॥ अश्विनी ॥ भरणी ॥ कृत्तिका ॥ रोहि
णी ॥ मृगशिरा ॥ आर्द्रा ॥ पुनर्वसु ॥ पुष्य ॥ आश्लेषा ॥ मघा ॥ पूर्वा ॥ उत्तरा ॥ हस्त ॥ चित्रा ॥ स्वा
ती ॥ विशाखा ॥ अनुराधा ॥ जेष्ठा ॥ मूल ॥ पूर्वाषाढ ॥ उत्तराषाढ ॥ श्रवण ॥ धनिष्ठा ॥ शततारा
पूर्वाभाद्रपद ॥ उत्तराभाद्रपद ॥ रेवती ॥ इति नक्षत्राणि ॥ विष्कुंभ प्रीति आयुष्मान सौभा
ग्य शोभन अतिगंड सुकर्मा धृति शूल गंड वृद्धि ध्रुव व्याघात हर्षण वज्र सि
द्धि व्यतीपात वरियान परिघ शिव सिद्धि साध्य शुभ शुक्ल ब्रह्म ऐंद्र वैधृति

हेमशशिर ३

रामि

चुचेचोला अश्विनी लिलुलेलो मे० आइउ१ कृ० ओवावीवुरो० वेवोकाकी मि० कुघं
ग ङ छ मि० केकोहाही पु० हुहेहो डा पु० डिडुडेडो क० मामिमुमे मघा मो टाटि टु
पू० फा० टेटो पापी उ० फा० पूष णाठ ह० पेपो राशी चि० ररुरेरो ता स्वा० तितुतेतो वि०
नानीनुनेअ० नोयायियु जे० येयो भाभि मू० भुधाफाढा पू० षा० भेभोजाजी उ० षा०
जुजेजो षा श्र० खाखिखुखे ध० गागिगुगे ध० गोसासिसु श० सेसोदादी पू० भा०
दुथझञ उ० भा० देदो चचि रे० इति नक्षत्र राशि चुचेचोला लिलुलेलो मे० इउ
एओ वावी वुवेवो वृ० ककिकुघङछ केको हमि० डु हिहुहेहो डाडिडुडेडो क० मामि
मुमे मोटाटि टुटे सिं० टोपापि पुषाणाठ पेपो क० ररि रुरेरो तातितुतेतो तु० ना
नितुनेनो यायि युवृश्चिक० येयो भाभि भूधाफाढा मे धं० भो जजि खिखुखे खो ग
गी मकर गुगे गोसा सिसु सेसो द कुंभ दीदुथाझञ देदो चाची मीन इति नामरासि
अश्विनीभरणी कृतिका पाद मेकं मेषं कृतिका नां त्रय पादा रोहिणी मृगशिरार्द्धं
वृष मृगशिरार्द्धं तु आर्द्रा पुनर्वसु पाद त्रयं मिथुन पुनर्वसु पाद मेकं पुष्य श्ले
षा तेकर्क मघा च पूर्वाफाल्गुनी उत्तरा पाद मेकं सिंह उत्तराणां त्रय पादा हस्त

चित्रार्धं तु स्वाती विशाखा पादत्रयं तु। विशाखा पदमेकं च अनुराधा ज्येष्ठा तथा वृश्चिके
मूलं च पूर्वाषाढा उत्तरा पादमेकं धन उत्तराषाढा त्रयो पादः धनिष्ठार्धं तु मकर धनि
ष्ठार्धं तु शतभिष पूर्वाभाद्रपद पाद त्रयं कुंभे ११ पूर्वाभाद्रपदमेकं उत्तरा रेवत्यां
ते मीनाः इति राशिनक्षत्राणि ॥ मीने मेषे चरणो चौलि सं। वृषे कुंभे चतुर सप्तपोः
मिथुने मकरे पंचमे कं। कर्के धने पंच पंना लि सं। वृश्चिक सिंहे पंच पंचा वन
कन्या तुला पंच वपालि सं। अजो मीने वरं स्थैव घटो वृषा दशा मिथुने मक
रे स्थैव चापु। कर्कटे ८ कादसे ग्रीद से। अलि सिंह स्यात्। कन्या तुले केद्रपो ११
वृपोत्तमा संचन वा केन्द्र रूपी कर नवे द्वाविंश षट्त्रिंश रंद्रशि तानि मानि शुला
महीनैव ग्रहं विधेपुं। तडाग वापी पिस्वन नं समस्तं १ अलोमे धासिं हेर लं यु
द्धकारि। वृषे कर्कटे तौ लिके खेत सिद्धि॥ धनुर्मीन पुंमे वृपी जे तुले कुम्भी।
मकर कुंभ कन्याश सिद्धा मत्स्यः ॥१॥ रविगुरुभौमपुरुषाख्या। चंद्र राहु भृ
गुः स्त्रियः केतु बुधशनि स्थैव नपुंसक ॥१॥ मेषे वृश्चिक पौ औ॥

शुक्रे वृषतुलाधिपे ॥ बुधकन्यामिथुने प्रोक्तो [redacted] कर्कस्याधिप चंद्रमाश्चामि
मीनं धनु जीवश्च शनी मकर कुंभयो सिंहस्याधिपतिः सूर्यः राशिनाथ हृताः यो
गिनी सुखदा वामे पृष्ठे वांछित दायिनी दक्षिणे धनहंत्री च सन्मुखे मरणप्र
दा इति योगिनी फलं ॥ शनौ नैऋत्ये स्यात् पूर्वे दक्षिणे चंद्र दिशा गुरौ सूर्ये शुक्रे पश्चि
मा याम्ये बुध भौमे तथोत्तरे इति दिशाशूलं ॥ सेकाति पिवारपूना कृत्वा राशि गुरु
भौमे उ विवहितवा सः सौख्या पहो मेश राशि पुमर शेष पाताय नासौ दिवि भूतले च
रक्ता चंद्र भवेत् पुष्टस्ये तच्चंद्रभवे तु सुखं पीनचंद्र भवे तल्लाभ कृष्ण चंद्रे महद्भयं
जन्मभूतमहानेत्रा रसद्धिकी १० वहि ३ सागरा ७ वेदा सिद्धि ४ शिवा ११ दिशा १ रुधा
तच्चंद्र विवर्जयेत् ॥ जच पुष्टि विवाहे च कुमारी पूजने तथा वाहने राजसेवायां
तच्चंद्र विवर्जयेत् इति घात चंद्रः रवि चतुरे का ल सोमे च यच्छ मे च भौमे तु
पश्चिमे कालं बुधे नैऋत्य मेव च गुरौ च दक्षिणे कालं शुक्रे आग्नेय मेव च शनि पूर्वी
ज वेशानं ॥ दक्षिणे सन्मुखे पृष्ठे वामे शुभ प्रदा इतिकाल ॥ नं हास्तु के बुध
हा जपा भौमे प्रकीर्तिता शनौ पूर्णा सिद्धि पोगा: प्रकीर्तिता: भौमार्क वर पोनं हाभदा मागे
रिक्तो गुरौ १
सिद्धि०

चित्रार्द्धं तु स्वाती विशाखा पादत्रयं तु ॰ विशाखा पदमेकं अनुराधा ज्येष्ठांते वृश्चिक
मूलं च पूर्वाषाढ उत्तरा पादमेकं धन उत्तराषाढा त्रयोपादः धनिष्ठार्द्धं तु मकर धनि
ष्ठार्द्धं तु शत(भि)षा पूर्वाभाद्र पद पाद त्रयं कुंभ ॥११ पूर्वाभाद्रपदमेकं उत्तरा रेवत्यां
ते मीनः इति राशि नक्षत्राणि ॥ मीने मेषे वृषेपो चौ लि सू । वृषे कुंभे च तुर सपपोः
मिथुने मकरे पंचमेकं । कर्के धने पंच पं ता लि सू । वृश्चिके सिंहे पंच ध्यावन
कन्या तुला पंचव पा लि सू ॥ जो मीने वृषश्चैव षट्तो वृषादशा मिथुने मक
रे श्चैव चा पू । कर्कटे का दस चौ दसो ॥ [illegible] लि सिंह स्यात् । कन्या तुल कं रूपो ॥११
प्रपोत्तन संचनवाक [illegible] रूपी वरन वैद्य [illegible] षट्त्रिंश रुद्र [illegible] तानि भानि शुला
महीनैव [illegible] विधे पुं । तडाग वर्षा पि खनं नं समस्त ॥ [illegible] लीमे वासिं हेर लो पु
द्धकारि । वृष कर्कटे तौ लिके स्वेत सिद्धि ॥ धनु मीन पुंमे पुं पी जेसु लक्ष्मी ।
मकर कुंभ कन्या शसि स्याम मत्युः ॥१॥ रवि गुरु भौम पुरुषाणां । चंद्र राहु स्त्र
गुरु स्त्रिपः केतु बुध शनिश्चैव नपुंसकाः ख्याते बुधैः ॥१॥ मेषे वृश्चिके पौ भौमः